# सुन्दरकाण्ड द्विपञ्चाशः सर्गः (५२) - ॥ दूतवधनिवारणम् ॥

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः ।
आज्ञापयद् वधं तस्य रावणः क्रोध मूर्छितः ॥ १ ॥

वधे तस्य समाज्ञप्ते रावणेन दुरात्मना ।
निवेदितवतो दौत्यं नानुमेने विभीषणः ॥ २ ॥

तं रक्षोऽधिपतिं क्रुद्धं तच्च कार्य मुपस्थितम् ।
विदित्वा चिन्तयामास कार्यं कार्यविधौ स्थितः ॥ ३ ॥

निश्चितार्थस् ततः साम्ना पूज्यं शत्रुजि दग्रजम् ।
उवाच हित मत्यर्थं वाक्यं वाक्य विशारदः ॥ ४ ॥

क्षमस्व रोषं त्यज राक्षसेन्द्र
प्रसीद मद्वाक्य मिदं शृणुष्व ।
वधं न कुर्वन्ति परावरज्ञा
दूतस्य सन्तो वसुधाधिपेन्द्राः ॥ ५ ॥

राज धर्म विरुद्धं च लोक वृत्तेश्च गर्हितम् ।
तव चा सदृशं वीर कपेरस्य प्रमापणम् ॥ ६ ॥

धर्मज्ञश्च कृतज्ञश्च राजधर्म विशारदः ।
परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥ ७ ॥

गृह्यन्ते यदि रोषेण त्वादृशोपि विपश्चितः ।
ततः शास्त्र विपश्चित्त्वं श्रम एव हि केवलम् ॥ ८ ॥

तस्मात् प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद ।
युक्तायुक्तं विनिश्चित्य दूते दण्डो विधीयताम् ॥ ९ ॥

विभीषण वचः श्रुत्वा रावणो राक्षसेश्वरः ।
रोषेण महताविष्टो वाक्य मुत्तर मब्रवीत् ॥ १० ॥

न पापानां वधे पापं विद्यते शत्रु सूदन ।
तस्मादेनं वधिष्यामि वानरं पाप चारिणम् ॥ ११ ॥

अधर्ममूलं बहुदोष युक्तम्
अनार्य जुष्टं वचनं निशम्य ।
उवाच वाक्यं परमार्थ तत्त्वं
विभीषणो बुद्धिमतां वरिष्ठः ॥ १२ ॥

प्रसीद लङ्केश्वर राक्षसेन्द्र
धर्मार्थ युक्तं वचनं शृणुष्व ।
दूता न वध्याः समयेषु राजन्
सर्वेषु सर्वत्र वदन्ति सन्तः ॥ १३ ॥

असंशयं शत्रुरयं प्रवृद्धः
कृतं ह्यनेना प्रिय मप्रमेयम् ।
न दूतवध्यां प्रवदन्ति सन्तो
दूतस्य दृष्टा बहवो हि दण्डाः ॥ १४ ॥

वैरूप्य मङ्गेषु कशाभि घातो
मौण्ड्यं तथा लक्षण सन्निपातः ।
एतान्हि दूते प्रवदन्ति दण्डान्
वधस्तु दूतस्य न नः श्रुतोऽपि ॥ १५ ॥

कथं च धर्मार्थ विनीत बुद्धिः
परावर प्रत्यय निश्चितार्थः ।

भवद्विधः कोप वशे हि तिष्ठेत्
कोपं नियच्छन्ति हि सत्त्व वन्तः ॥ १६ ॥

न धर्मवादे न च लोक वृत्ते
न शास्त्र बुद्धि ग्रहणेषु चापि ।
विद्येत कश्चित्तव वीर तुल्यः
त्वं ह्युत्तमः सर्वसुरा सुराणाम् ॥ १७ ॥

पराक्रमोत्साह मनस्विनां च
सुरासुराणा मपि दुर्जयेन ।
त्वयाप्रमेयेन सुरेन्द्र सङ्घा
जिताश्च युद्धेष् वसकृन् नरेन्द्राः ॥ १८ ॥

इत्थं विधस्यामर दैत्य शत्रोः
शूरस्य वीरस्य तवाजितस्य ।
कुर्वन्ति वीरा मनसो प्यलीकं
प्राणैर् वियुक्ता न तु भो पुरा ते ॥ १९ ॥

न चाप्यस्य कपेर् घाते कञ्चित् पश्याम् यहं गुणम् ।
तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥ २० ॥

साधुर्वा यदि वासाधुः परैरेष समर्पितः ।
ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ २१ ॥

अपि चास्मिन् हते राजन् नान्यं पश्यामि खेचरम् ।
इह यः पुनरागच्छेत् परं पारं महोदधेः ॥ २२ ॥

तस्मान् ना स्य वधे यत्नः कार्यः पर पुरञ्जय ।
भवान् सेन्द्रेषु देवेषु यत्न मास्थातु मर्हति ॥ २३ ॥

अस्मिन् विनष्टे न हि दूतमन्यं
पश्यामि यस्तौ नर राजपुत्रौ ।
युद्धाय युद्ध प्रिय दुर्विनीतौ
उद्यो जयेद्दीर्घ पथावरुद्धौ ॥ २४ ॥

पराक्र मोत्साह मनस्विनां च
सुरा सुराणा मपि दुर्जयेन ।
त्वया मनो नन्दन नैर्ऋतानां
युद्धायतिर् नाशयितुं न युक्ता ॥ २५ ॥

हिताश्च शूराश्च समाहिताश्च
कुलेषु जाताश्च महागुणेषु ।
मनस्विनः शस्त्र भृतां वरिष्ठाः
कोट्यग्रतस्ते सुभृताश्च योधाः ॥ २६ ॥

तदेक देशेन बलस्य तावत्
केचित् तवादेश कृतोऽभियान्तु ।
तौ राजपुत्रौ विनिगृह्य मूढौ
परेषु ते भावयितुं प्रभावम् ॥ २७ ॥

निशाचराणा मधिपोऽनुजस्य
विभीषणस् योत्तम वाक्य मिष्टम् ।
जग्राह बुद्ध्या सुरलोक शत्रुः
महाबलो राक्षस राजमुख्यः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

STOTRADHWANI